'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2022

## SANSKRIT

## PAPER-VII

## NEW AND OLD SYLLABUS

Time Allotted: 4 Hours | Full Marks: 100

*The figures in the margin indicate full marks.*

### विभागः—क

1. हिरण्यगर्भसूक्ते प्रतिफलितं दार्शनिकतत्त्वम् आलोच्यताम्। 8

अथवा

अग्नेः चारित्रिकं वैशिष्ट्यमालोचयत।

2. संस्कृतेन व्याख्या कार्या (एकस्य) – 6

(क) अग्निर्होता कविक्रतुः

सत्यश्चित्र श्रवस्तमः।

देवो देवेभिरा गमत्॥

(ख) य आत्मदा बलदा यस्य विश्व

उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः

कस्मै देवाय हविषा विधेम॥

3. आङ्गलभाषया बङ्गभाषया वा अनूद्यताम् (एकः) – 5

(क) उप त्वाग्ने दिवेदिवे

दोषावस्तर्धिया वयम्।

नमो भरन्त एमसि।।

(খ) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे विचष्टे सवितायमर्यः।।

4. व्याख्या कार्या– 6

अग्निमीले इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्।

अथवा

द्वयोः टीका लेख्या – 3×2 = 6

विनियोगः, याज्या; आधानम्; यागः।

विभागः—ख

5. अथर्ववेदीय भूमिसूक्तमनुसृत्य पृथिव्याः सौन्दर्यमालोचनीयम्। 10

अथवा

अथर्ववेदीय भूमिसूक्तस्य सारसंक्षेपः कार्यः।

विभागः—ग

6. (क) शुनःशेपोपाख्यानमालोच्य पुरुषमेधस्योपरि विचारः करणीयः। 10

अथवा

(খ) शुनःशेपोपाख्यानं कुत्र वर्तते ? अस्य उपाख्यानस्य वैशिष्ट्यम् आलोचयत।

7. आङ्गलभाषया बङ्गभाषया वानुवादः कार्यः (द्वयोः) – 5×2 = 10

(क) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति॥

(খ) पुष्पिणौ चरतो जङ्घे, भृष्णुरात्मा फलग्रहिः।
शेतेऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे इतश्चरैवेति॥

(গ) कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति॥

## विभागः—घ

8. बृहदारण्यकोपनिषदमनुसृत्य जीवात्मनः स्वरूपमालोचनीयम्। 10

अथवा

बृहदारण्यकोपनिषद्दिशा मोक्षस्य स्वरूपमालोच्यताम्।

9. संस्कृतेन व्याख्या कार्या (एकस्य)– 6

(क) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनु वित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥

अथवा

(ख) ''तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च''।

10. आङ्गलभाषया बङ्गभाषया वा एकः अनुद्यताम् – 4

(क) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथो मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

अथवा

(ख) अनन्दा नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभि गच्छन्त्यविद्वांसोऽबुधो जनाः॥

## विभागः—ङ

11.(क) पदपाठः प्रदर्श्यताम् – [Q. No. 2.(क) अथवा 3.(क)]। 7

(ख) वैदिकसमासस्य अथवा लेट्-लकारप्रयोगस्य वैशिष्ट्यमालोचयत। 12

(ग) द्वयोः व्याकरणगता टीका लेख्या – 3×2 = 6

(i) कविक्रतुः Q. no. 2.(क)।

(ii) दिवेदिवे Q. no. 3.(क)।

(iii) विधेम Q. no. 2.(ख)।

——×——